Title पार्थिवलिङ्गपूजाविधिः

Author

Extent ६ Age

Subject धर्मशास्त्रम् . सम्पूर्णम्


नं० ११३२-घ

पार्थिवलिंगपूजाविधिः (धर्मशास्त्रम्)

पत्राणि ९ (सम्पूर्णम्)

नं० ११३२-घ

९ पत्रे



॥श्रीगणेशायनमः॥ अथपार्थिवलिंगपूजाविधिः॥ मृदाहरणंसंघट्टप्रति
१ ष्ठाध्यानमेवच॥ स्नपनंपूजनंचैवविसर्जनमतःपरं॥१॥ सर्वकामनासिद्ध्य
र्थंपार्थिवलिंगपूजाप्रतिष्ठांकरिष्ये॥ सद्योजातमितिमृदाहरणं॥ वामदे
वायेतिजलं॥ ईशानइतिवेदिकायांबाणं॥ संयोजयेत्॥ नमःशिवायेतिमूलमंत्रे
ण षोडशोपचारपूजांकुर्यात्॥ भवायभवनाशायमहादेवायधीमते॥ उग्रायचोग्रना
शायशर्वायशशिमौलिने॥ अनेनमंत्रेण पूजयेत्॥ यःकृत्वापार्थिवंलिंगंपूजयेत्सुभवेदि
कं इहैवधनवान्धीमान्तेनभ्योरुद्रोभिजायते॥१॥ त्रिसंध्यंयोर्चयेल्लिंगंकृत्वा
लिंगंचपार्थिवं॥ दशैकादशकंयावत्तस्यपुण्यफलंशृणु॥२॥ अनेनैव १

अघोराइति [illegible] संकुर्यात्

स्वदेहे नरः दुःसंभवति ध्रुवं पापहास[illegible] नादर्शनास्पर्शनादपि ॥ प्रणा घोरा वियोग
स्य धनयोगवियोगाते ॥ निमित्तं निमित्तार्थं वा शीघ्रं तु शिवपूजनं ॥ अनेनप्रकारेण
वं धर्मेत्तार्थं प्रथमदिवसादारभ्य एकविंशतिदिनपर्यंतं शिवपूजा कार्या ॥ उत्तरोत्तर वृ
[illegible] ड्या कार्या ॥ द्वाविंशादारभ्य एकैकस्या हेनन्यूनं कार्यं स्पर्योमुक्तो भवति ॥
इति पार्थिवलिंगपूजाविधिः ॥ एकादशप्रकारेण कथ्यते ॥ पुरुषो वा स्त्री तस्य विधाने
प्रतिदिनमेकं कृत्वा षोडशोपचारान्कृत्वा रिंगिणीपुष्पं च तन्नैवेद्यं एवं शतदिनपर्यंतं
पूजयेत् ॥ क्रमेण मुक्तो भवति ॥ एवं प्रतिदिनं द्वयं कृत्वा षोडशोपचारान्कृत्वा ॥ मलि

कापुष्पं गुडनैवेद्यं त्रिंशतदिनं पूजां कुर्यात् ॥ पुत्रो भवति ॥ प्रतिदिनं लिंगत्रयं कृत्वा करवी
रपुष्पं ॥ शर्करानैवेद्यं पंचशतदिन पूजां कृत्वा ॥ चतुरो भवति ॥ प्रत्यहं चत्वारि लिंगानि कुर्यात्
कुसुमपुष्पं ॥ कदलीफलनैवेद्यं ॥ सप्तदिन पूजां कृत्वा ॥ द्रव्यागमनं भवति ॥ प्रतिदिनं पंच
लिंगानि कृत्वा ॥ चंपकपुष्पं ॥ पयोनैवेद्यं ॥ पंचशतदिनपर्यंतं पूजां कृत्वा ॥ विवाहो भवति
॥ प्रतिदिनं षट् लिंगानि कृत्वा ॥ बकुलपुष्पं ॥ मधुनैवेद्यं शतदिनपर्यंतं ॥ पूजां कृत्वा म
क्षो भवति ॥ प्रतिसप्तलिंगानि कृत्वा शतपत्रपुष्पं दध्योदननैवेद्यं ॥ पंचशतदिनं पूजां कृ
त्वा ॥ तीर्थयात्रा भवति ॥ प्रतिदिनं अष्टलिंगानि कृत्वा ॥ बिल्वपत्रं लड्डुकानैवेद्यं ॥ त्रिं
शत्दिनं पूजां कृत्वा ॥ विद्या भवति ॥ प्रतिदिनं नवलिंगानि कृत्वा ॥ धत्तूरपुष्पं ॥ सर्वमन्त्रे

नैवेद्यं एकविंशति दिनपर्यंतं पूजां कृत्वा ॥ व्यापारो भवति ॥ लिंगाद्दशांके ॥ चंपकपुष्प
अर्पणे नैवेद्यं ॥ वर्षमेकं कृत्वा ह्रासाघ्रागमनं भवति ॥ अस्य श्रीपार्थिवेश्वर चिंतामणि
विद्यामंत्रस्य निग्रहानुग्रहकर्ता ब्रह्मा ऋषिः कामदुघा गायत्री छंदः ॥ श्रीज्ञवरप्र
दरूपी श्रीपार्थिवेश्वरचिंतामणिर्देवता ॥ ॐ ह्रौं बीजं ह्रीं शक्तिः ॥ नमः कीलकं ॥ मम
भीष्टसिद्ध्यर्थं जपे विनियोगः ॥ ॐ ह्रौं ह्रीं सर्वज्ञाय शिवाय हृदयाय नमः ॥ ॐ ह्रौं ह्रीं सर्व
तसिशिवायः ॥ सिरसे स्वाहा ॥ ॐ ह्रौं ह्रीं नित्यालुप्तशक्ति शिवाय शिखायै वौषट् ॥
ॐ ह्रौं ह्रीं सर्वज्ञानशक्ति ॥ शिवाय कवचाय हुं ॥ ॐ ह्रौं ह्रीं नित्यानंदशक्ति शिवाय नेत्र
त्रयाय वौषट् ॥ ॐ ह्रौं ह्रीं अनंतशक्ति शिवाय क... य हृदय अस्त्राय फट् ॥ एतान् षडं
गमंत्रान् अंगुष्ठादिकनिष्ठिकांतं हस्तयोः हृदयादिषु न्यसेत् ॥ कर्पूरगौरं करुणावतारं संसा
रसारं भुजगेंद्रहारं सदा वसंतं हृदयारविंदे भवं भवानीसहितं नमामि ॥ १ ॥ शमी ॥

गर्भो दृष्ट्वाऽस्मरत्वान्यन्निका ॥ माहात्म्यं यथोक्तं प्रयोगं विधाय पूजां कुर्यात् ॥ तद्यथा ॐ
२ जूं ह्रौं ह्रीं सः ॥ हराय नमः इत्यनेन मृदाहरणं ॥ ॐ ह्रौं ह्रीं जूं सः महेश्वराय नमः ॥ इति संघ
3 ट्टनं ॥ ॐ ह्रौं ह्रीं जूं सः शूलपाणये नमः प्रतिष्ठापनं ॥ ॐ ह्रौं ह्रीं जूं स पिनाकधृते नमः
इत्यावाहनं ॥ शम्भवे नमः ॥ इति वेदिकावामदेशे संस्थाप्य ॥ ॐ नमो भगवत्यै ॥ उमादेव्यै
शोकरहितायै नमः ॥ इति उमां पूजयेत् ॥ ॐ ह्रौं ह्रीं जूं सः पशुपतये नमः ॥ इति स्नानम् ॥
ॐ ह्रौं ह्रीं जूं सः शिवाय ॥ प्रपन्नपारिजाताय [illegible]हा ॥ पूजांते इमं मंत्रं नित्यमष्टोत्त
रशतं जपेत् ॥ अनेनैव मंत्रेण नित्यमेकादशशाल्याहुतीर्जुहुयात् ॥ एवमर्चयतः
पुंसः पार्थिवलिंगमुत्तमं ॥ मासत्रयेण सिद्धिः स्यात् नात्र कार्या विचारणा ॥ इति ।
श्री रुद्रयामले कामकौतुके मन्त्रमहार्णवे पार्थिवलिंगपूजाविधिः ॥ नारद उ
वाच ॥ धर्मार्थकाममोक्षाणां साधकं परमं हितं ॥ तन्मे सर्वं कथय प्रभो त्वं ह्यनुग्राह्यो
स्मि चेत्तव ॥ १ ॥

नमः इति गंधाद्युपचारैः पूजनं ॐ ह्रौं ह्रीं जूं सः महादेवाय नमः
इति विसर्जनं ॐ ह्रौं ह्रीं जूं सः [illegible] २५

पाप
सर्वाभीष्टप्रदायकं सर्वारिष्टनिवारणं ॥ सर्ववश्यकरं चैव कलौ सर्वत्रसिद्धिदं ॥ २ ॥ ईश्वर
३ उवाच ॥ शृणु नारद वक्ष्यामि शिवपूजाविधानकं ॥ यस्यानुष्ठानमात्रेण कृतकृत्यो भवेत्
नरः ॥ ३ ॥ अकृत्वा पार्थिवं लिंगं योन्यदेवं प्रपूजयेत् ॥ वृथा भवति सा पूजा स्नानदानादिकं
वृथा ॥ ४ ॥ शुद्धां मृदं समानीय पुनः शोधयेद्विशेषतः ॥ लिंगाकारं ततः कुर्याद्यथोक्तेविधिना
प्रमाणं ॥ ५ ॥ पूजयेच्च विधानेन लिंगं पार्थिवमुत्तमम् ॥ अथ वं ॐकारयेत् यत्नाद्धलमात्रेश्च ना
मभिः ॥ ६ ॥ मृदाहरणसंघट्टप्रतिष्ठाध्यानमेव च ॥ स्नापनं पूजनं चैव क्षमस्वेति विस
र्जनम् ॥ ७ ॥ हरो महेश्वरः शूलपाणिः पिनाकधृक् ॥ पशुपतिः शिवश्चैव महादेव इति क्र
मात् ॥ ८ ॥ विस्रवं यः करोत्येतत्तस्य पूजाविनिःफला ॥ पंचजं तु फलाकांक्षं सर्वकामप्रदं
शिवं ॥ ९ ॥ विपरीतं यः करोत्येवं हानिः पीडाकरं भवेत् ॥ कुर्यात्प्रासादबीजेन मूलमंत्रेण पू
जनम् ॥ १० ॥ नारद उवाच ॥ शर्वो भवश्च रुद्रश्च उग्रो भीमश्च तिविति महादेवपशुपतिरीश्व
मूर्तिः प्रपूजयेत् ॥ ११ ॥ नारद उवाच ॥ देवदेव न विधानेन कर्त्तव्यं कामदम् यस्यानुष्ठान
यं सर्वदा५

मान्यमाकृतिर्हुत्वा सोमवेन्नार: ॥१२॥ क्षितिरापोनलोवायुराकाशः सोमसूर्यकौ ॥ यजमान
इत्यष्टौ मूर्तयः परिकीर्तिताः ॥१३॥ ईश्वर उवाच ॥ मुने सर्वप्रयत्नेन पार्थिवं लिंगमुत्त
मम् ॥ कर्तव्यं चैव विधिवत् नित्यं कार्यमुद्दिश्य यत्नतः ॥१४॥ अथ वक्ष्ये पार्थिवं लिंगं हि देवस्याव
रसत्तमं ॥ पूर्वोक्तेन विधानेन पूज्यं लिंगं तु पार्थिवं ॥१५॥ संख्या पार्थिवलिंगानां यथाकामं नि
गद्यते ॥ विद्यार्थी लिंगसाहस्रं धनार्थी च तदर्धकम् ॥१६॥ पुत्रार्थी सार्द्धसाहस्रं कामा
र्थी शतपंचकं ॥ मोक्षार्थी कोटिगुणितं तं भूकामस्सहस्रकं ॥१७॥ भूपार्थी त्रिसहस्रं च
तीर्थार्थी द्विसहस्रकं ॥ सुहृत्कामं त्रिसाहस्रं वश्यार्थी शतमष्टकं ॥१८॥ मारणार्थी स
प्तशतं मोहनार्थी शताष्टकं ॥ उच्चाटनपरो यश्च सहस्रं च यथोक्ततः ॥१९॥ स्तंभने तु स
हस्रं तु मारणे तु तदर्धकं ॥ निगडान्मुक्तिकामस्तु सहस्रं साधमीरितं ॥ २० ॥ महाराजभये रामः
पंचशतं चौरादिसंकटे ॥ शतं द्वयं तु डाकिनीनां भये पंच शतं परम् ॥ २१ ॥ दारिद्र्ये पंच ८

साहस्रेण्वयुतं सर्वकामदं एकं पापहरं प्रोक्तं द्विलिंगं चार्थसिद्धिदम् २२ त्रिलिं
गं सर्वकामानां कारणं परमीरितम् उक्तेन क्रमेणैव स्यात् पूर्वोक्तगणानां विधिः २३ ग्रंथा
न्तरे लिंगानामयुतं कालमहाराजभयं हरेत् सहस्राणि तथा पंच निगडान्मुक्तये
ध्रुवम् कारागृहविमुक्त्यर्थमयुतं कारयेद्बुधः सहस्राणां सहस्रं चाष्टादश पुत्रो
हि कारयेत् २५ लिंगानामयुतेनैव कन्यासंततिं लभेत् एकलिंगार्चनेनैव
ह्यतुलां श्रियमाप्नुयात् २६ लक्षमेकं च लिंगानां यः करोति नरो भुवि शिव
एव भवेत्सोपि नात्र कार्या विचारणा २७ अर्चा पार्थिवलिंगानां कोटियज्ञफलप्र
दा भुक्तिमुक्तिप्रदा नित्यं ततः कामार्थिनां नृणां २८ ब्रह्मस्वपरिहारार्थं सुवर्णं
लिंगमर्चयेत् लवणेन च सौभाग्यं पार्थिवं सर्वकामदम् २९ अनेकरत्नहेम
मैरत्नोघं परिकीर्तितं अन्नार्थमन्नदं प्रोक्तं गंडोत्थं प्रीतिवर्धनं ३० गंधोत्थं भोग
दं प्रोक्तं शर्करोत्थं सुखप्रदम् एवं विशेषद्रव्यैर्लिंगं संप्राप्य कामानर्चयेत् मानव ३१ ॥

५

5

केशास्थिसंभवं लिंगं सर्वशत्रुविनाशनम् । आरालं लवणोत्थं च सर्वलोकवशंकरं ३२

स्तंभने रजनीपिष्टसंभवं लिंगमुत्तमम् । तंडुलोद्भवपिष्टोत्थं लिंगं विद्याप्रदं स्मृतं ३३

दधिदुग्धोद्भवं लिंगं कीर्तिलक्ष्मीसुखप्रदं । धान्यजं धान्यदं लिंगं फलोत्थं फलदं भवेत् ३४

ग्रामदं तिलपिष्टोत्थं तद्धोत्थमौरतो स्मृतं । तद्योत्थं दिव्यभोगाप्तं मुक्तिधात्रीफलोद्भवं ३५

नवनीतोद्भवं लिंगं स्मृतं सुखप्रदं परम् । इंद्रनीलसमं लिंगं बहुपोषणाकामसिद्धिकृत् ३६

बहुसौख्यमितफलदं स्फाटिकं मुनिभिः स्मृतं । विद्रुमं मुक्ताघेतुरत्नं फलदं लिंगं रजतसंभवं ३७

हेमजं सर्वलोकेशं प्राप्नोतु पूजयेत्सुमान् । पूजयेत्ताम्रजं लिंगं पुष्टिकामो हि मानवः ३८

तुष्टिकामस्तु सततं लिंगं पित्तलसंभवं । कीर्तिकामो यजेल्लिंगं सरांकांस्यसमुद्भवं ३९

शत्रुमारणकामस्तु लिंगं लोहमयं सदा । सीसकोहमयं लिंगं आयुःकामो यजेत्सदा ४०

कलत्रीसंभवं लिंगं धनःकामः प्रपूजयेत् । लिंगं गोरोचनोत्पन्नं रूपकामस्तु पूजयेत् ४१

कीर्तिकामस्तु नियतं लिंगं कुंकुमकेसरं । श्वेतागरुसमुद्भूतं महाबुद्धिविवर्धनम् ४२ ५

धारणाशक्तिदं लिंगं कृष्णागरुसमुद्भवं । सौधूमपिष्टजं लिंगं भोगकामो नित्यमर्चयेत् ४३

गुडपिष्टमयंलिंगं–मधुनामदमाप्नुयात् माषपिष्टमयंलिंगंनित्यंपिष्टान्नसिद्धिदं ४४
व्रणकोद्रवपिष्टेनलिंगंसिद्धिविवर्धनं आढकीपिष्टजंलिंगंरतिसौख्यविवर्धनं ४५
लिंगंव्रीहिमयंपूज्यंवशकामेननित्यशः यवधान्यसमंलिंगंयमलोकनिवारणं ४६
प्रियंगुपिष्टजंलिंगंसर्वारिष्टनिवारणं घृतकर्दमसंभूतंलिंगंप्रीतिविवर्धनं ४७
यःकरोतितिलैःपिष्टैःश्वेतदीपैर्महीयते यःकरोत्यक्षतिलैःसम्यलिंगंकृत्वाचयेन्नरः ४८
कामवल्लिप्रियोनित्यंभवेत्स्त्रीणांहिमानवः ग्रीष्मेचमल्लिकापुष्पंसंभवंलिंगमुत्तमं ४९
पूजयित्वानरोभक्त्याप्राप्नोतिमहतींकृषीं वर्षासुपूजयेद्दूर्वालिंगंकनकपुष्पजं ५०
चात्रहसुभिक्षेलोकेसुखीभवतिमानवः नीलोत्पलमयंलिंगंकृत्वाप्रावृद्धिमानवः ५१
पूजयेत्परमांसिद्धिंभक्त्याप्राप्नोतिमानवः हेमन्तेजातकुसुमैर्लिंगंकृत्वामनोहरं ५२
भक्त्यासमर्च्यमतिमान्शिवेनसहमोदते शिशिरेसर्वपुष्पोत्थंलिंगमभ्यर्च्यमानवः ५३

पार्थि.
६

सर्वपापं विहायाशु मोदते ब्रह्मणा सह । येन केन प्रकारेण यस्यां कस्यापि वस्तुनः ५४
कृत्वा लिंगं समभ्यर्च्य गाणपत्यमवाप्नुयात् । विना लिंगार्चनं यस्य कालो गच्छति नित्यशः ५५
महाहानिर्भवेत्तस्य दुर्वृत्तस्य दुरात्मनः । एकतः सर्वदानानि व्रतानि विविधानि च ५६
तीर्थानि नियमा यज्ञा लिंगार्चा चैकतः स्मृताः । कलौ लिंगार्चनं श्रेष्ठं यथा लोके प्रदृश्यते ५७
तथान्यन्नास्ति नोस्तीति शास्त्राणामेव निश्चयः । भुक्तिमुक्तिप्रदं लिंगं विविधापन्निवारणं ५८
पूजयित्वा नरो नित्यं शिवसायुज्यमाप्नुयात् । लिंगानामपि सर्वेषां पार्थिवं लिंगमुत्तमं ५९
कृत्वा संपूज्य विधिवत्सर्वान्कामानवाप्नुयात् । पाषाणसंभवं लिंगं संपूज्य परमामुदा ६०
इष्टकामानवाप्नोति प्राप्नोति परमं सुखं । पाषाणात्स्फटिकं श्रेष्ठं स्फाटिकात्पद्मरागजं ६१
पद्मरागाच्च काश्मीरं काश्मीरात्पुष्परागजं । वैडूर्यनीलं पुष्परागाद्वै इन्द्रनीलाच्च गोमेदं ६२
गोमेदाद्विद्रुमं श्रेष्ठं विद्रुमान्मौक्तिकं परं । मौक्तिकाद्धेमजं श्रेष्ठं हेमतो वर्णराजतात्परं ६३

हैमवर्णाद्धीरकं श्रेष्ठं हीरकात्स्फाटिकं पारदाद्बाणजं श्रेष्ठं तस्माच्छ्रेष्ठं न विद्यते ६४
नर्मदाजलमध्यस्थं बाणलिंगेष्वधिष्ठिता बाणासुरार्चितं लिंगं बाणलिंगं तदुच्यते ६५
न दर्शं विधिवद्भक्त्या शिवलोके महीयते बाणलिंगे न चंडांशो न चापि निर्माल्यकल्पना ६६
सर्वं बाणार्पितं ग्राह्यं भक्त्या भक्तेन चान्यथा बाणलिंगे स्वयंभूते चंद्रकांते हृदि स्थिते ६७
चांद्रायणसमं ज्ञेयं शंभोर्नैवेद्यभक्षणात् ग्रासग्रासप्रविभागेन एवं बाणलिंगे न विद्यते ६८
बाँ लिं = नर्दितजलं ... ग्राह्यं प्रसादमं तथा बाणे च राजते रत्ने स्फाटिके हेमसंभवे ६९
काश्मीरे चन्द्रकांते च लिंगे स्वायंभुवे तथा सदा सन्निहितो देवः सांबः सत्यादिलक्षणः ७०
विद्यते इति प्रोक्तं यस्मात्कर्जा कार्यं च नित्यशः शिवनाभिमयं लिंगं नित्यं पूज्यं मनीषिभिः ७१
बाणाः सर्वलिंगेभ्यः तस्मात्पूज्यं विधानतः उत्तमं मध्यमं नीचं त्रिविधं लिंगमीरितं ७२
चतुरंगुलमं — ध्यमं वेदिकया युतं उत्तमं लिंगमाख्यातं मुनिभिः शास्त्रकोविदैः ७३
तदर्धं मध्यमं प्रोक्तं तस्यार्द्धं मध्यमं स्मृतं एवं लिंगसमाराध्य भक्तो भक्त्या समन्वितः ७४

पा॰पु॰ लि
७

पूजयित्वा लभेत्कामान्मनसा यान्नभीप्सितान् नलिंगाराधनादन्यत्पुण्यं वेदचतुष्टये ७५
विद्यते सर्वधर्माणामेष एव विनिश्चयः सर्वमन्यत्परित्यज्य कर्मजालमशेषतः ७६ ॥
भक्त्या परमया विद्वान्लिंगमेकं प्रपूजयेत् लिंगेर्चितं सर्वजगत्स्थावरं जंगमं तथा ७७
संसारांबुधिमग्नानां नान्यत्तारणसाधनं अज्ञानतिमिरांधानां विषयासक्तचेतसां ७८
प्लावो नान्योस्ति जगति लिंगाराधनमंतरा ब्रह्मादयः सुराः सर्वे मुनयो यक्षराक्षसाः ७९
गंधर्वाश्चारणाः सिद्धा दैतेया दानवास्तथा पूजयित्वा महाभक्त्या लिंगं सर्वार्थसिद्धिदं ८०
शामाकामानभीप्सांश्च प्राप्तास्तान्सर्वजनप्रियान् ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वाप्यन्त्यलोमजाः ८१
पूजयेत्सततं लिंगं तत्तन्मंत्रेण सादरं द्विजन्मा वैदिकेनापि मार्गेणाराधनं परं ८२
अन्येषामपि जंतूनां वैदिकेनापि तंत्रतः तत्रोक्तं दीक्षितानां च तंत्रोक्तेन विधानतः ८३
स्वतंत्रमाराधनं शंभोर्नैव वैदिकवर्त्मना वैदिकानां च सर्वेषां पूजा वैदिकमार्गतः ८४
कर्तव्या नान्यमार्गेण इत्याह भगवाञ्छिवः दधीचगौतमादीनां शापसंदिग्धचेतसां ८५

राम:
७

नजायतेचमहतिः श्रद्धावैदिकवर्त्मनि योवैदिकमनादृत्य कर्मस्मार्तमथापिवा ८६
अन्यत्समाचरेन्मर्त्यो निष्कर्मफलजं लभेत् उक्तेष्वेतेषुलिंगेषुलिंगमेकंसमाश्रयेत् ८७
तत्रापिपार्थिवंलिंगंद्विजश्रेष्ठसिद्धिप्रदंभवेत् पार्थिवेनतुलिंगेनबहवःसिद्धिमागताः ८८
देवासुरमनुष्याश्चगंधर्वोरगराक्षसाः कृतेमणिमयंलिंगंत्रेतायांहेमसंभवः ८९
प२५ द्वापरेपारदंश्रेष्ठंपार्थिवंतुकलौयुगे अष्टमूर्तिषुसर्वासुमूर्तिर्वैपार्थिवीवरा ९०
पार्थिवंलिंगंतुलिंगेष्वन्येषुविद्यते यथासर्वेषुलिंगेषुज्येष्ठःश्रेष्ठोमहेश्वरः ९१
एवंसर्वेषुलिंगेषुपार्थिवंश्रेष्ठमुच्यते यथासर्वेषुदेवेषुप्रणवोहिमहान्स्मृतः ९२
तथेदंपार्थिवंलिंगमाराध्यंपूज्यमेवहि पार्थिवाराधनंपुण्यंधनमायुर्विवर्द्धनं ९३
तुष्टिदंपुष्टिदं[illegible]कार्य्यसाधकमुत्तमैः यथालब्धोपचारैश्चभक्तिश्रद्धासमन्वितः ९४
पूजयेत्पार्थिवंलिंगंशास्त्रोक्तविधिनानरः पंचसूत्रविधानेनपार्थिवेनविचारयेत् ९५
यथाकथंचिद्विधिनारम्यंसंप्रकारयेत् पार्थिवंपिष्टजंपोष्यमरवंदंतंप्रकारयेत् ९६

पा॰ ५८ ४

अखंडं तु वा लिंगं द्विखंडमचरं स्मृतं अखंडं तर्हि कर्तव्यः न द्विखंडं प्रकारयेत् ९७
द्विखंडलिंगं कुर्वाणो नैव पूजाफलं भवेत् रत्नजं हेमजं लिंगं पारदं स्फाटिकं तथा ९८
पूजाखंडविचारोयमचारचयोस्मृतः वेदकामं महालिंगं देवो महेश्वरः ९९
अतो हि स्थावरे लिंगे स्मृताभ्रेष्ठादिखंडता द्विखंडं स्थावरे लिंगं कर्तव्यं हि विधानतः १००
अखंडं जंगमे प्रोक्तं शैवसिद्धांतवेदिभिः द्विखंडे जंगमं लिंगं कुर्वंत्यज्ञातिमोहिताः १०१
नैव सिद्धांतवेत्तारस्मुनयः शास्त्रपारगाः अखंडं स्थावरं लिंगं द्विखंडं चरमेव च १०२
ये कुर्वंति नरा मूढाः न पूजाफलभागिनः तस्माच्छास्त्रोक्तविधिना अखंडं चरसंज्ञकं १०३
द्विखंडं स्थावरं लिंगं कर्तव्यं परया मुदा अखंडेन चरैः पूजा संपूर्णफलदा स्मृता १०४
द्विखंडे स्थावरे लिंगे संपूर्णफलदायिनी अथ वैदिकपूजानां पार्थिवानां निगद्यते १०५
विधिर्वेदोक्तः सम्यक् संपूर्णफलसिद्धये यथोक्तविधिना स्नात्वा संध्यां कृत्वा यथाविधिः १०६
ब्रह्मयज्ञं विधायादौ ततस्तर्पणमाचरेत् नित्यनैमित्तकं कर्म विधायानंतरं पुमान् १०७

पा· ८९

१

पूजयेत्परया भक्त्या पार्थिवं लिंगमुत्तमं नदीतीरे तडागे वा पर्वते कानने पि वा १८ शिवा-
लये शुचौ देशे पार्थिवार्चा विधीयते शुद्धप्रदेशसंभूतां मृदमाहृत्य यत्नतः १९ विप्रे गौ-
रा स्मृता शोणा बाहुजे पीतवर्णिका वैश्ये कृष्णा समाख्याता शूद्रे वा यत्र या भवेत् ११
सा ग्राह्या स्मरति कालिंगनिर्माणे पंचयत्नः स्नानीयशुद्धदेशोत्थसंस्थाप्य स्मृदमुत्तमां ११
मृद्गोमयं च जलेनाशु पिंडीकृत्य शनैः शनैः पश्चाल्लिंगं विधायाशु कर्मणानेन भक्तिमान् ११२
हरो महेश्वरः शंभुः शूलपाणिः पिनाकधृक् शिवः पशुपतिश्चैव महादेव इति क्रमात् ११३
मृदाहरणसंघट्टप्रतिष्ठा ध्यानमेव च स्नपनं पूजनं चैवतमापनविसर्जने ११४ ओंकारादि
चतुर्थ्यंतैर्नमोन्तैर्नामभिः क्रमात् कर्तव्यास्तु क्रियास्सर्वा भक्त्या परमया सदा ११५ अद्येत्यादि देश-
कालौ स्मृत्वा मम एककामनासिद्ध्यर्थं पार्थिवलिंगपूजनमहं करिष्ये इति संकल्प ॐ हराय
नमः इति मृदाहरणं ॐ महेश्वराय न· संघट्टनं ॐ शंभवे न· प्रतिष्ठापनं ॐ शूलपाणये· आवाहनं
ॐ पिनाकधृते· स्नापनं ॐ शिवाय· पूजा ॐ पशुपतये· क्षमापनं इति महादेवाय· विसर्जनं
ततः पंचाक्षरमंत्रं जपेच्च त्रियावान्स्तुतिभिश्चैव देवेशं कृताननं तु विसर्जयेत् अथ ध्यानं
ध्यायेन्नित्यमिति ध्यानं ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं रत्नाक।

सं० ११३२ ८
पार्थिवलिङ्गपूजाविधिः
९ पत्राणि
[illegible]